**तलवकार** पु० सामवेदशाखाभेदे "छान्दोग्ये तवलकारा-(तलवकारा) दिशाखाभेदेषु विलक्षणगीतिहेतवोऽक्षर-विकारादय आम्नायन्ते" सा० स० भाष्यम् । तच्छ्रवो-पनिषत् "केनेषितं पततीत्यादि" ।

**तलवारण** न० तले बाहुतले वारयति ज्याघातम् वारि-ल्यु । ज्याघातवारणार्थे हस्ततले बद्धे (चामाटी)चर्मभेदे

**तलसारक** न० तले वक्षःस्थलाधोभागे सारोबलं यस्मात् कप् । अश्वस्य वक्षोऽधोभागे बद्धरज्जुभेदे (तङ्) हेमच० ।

**तलहृदय** न० तलस्य हृदयमिव । पादतलस्य मध्यस्थाने हेम०

**तला** स्त्री तलं ज्याघातवारणार्थत्वेनास्त्यस्याः अच् । १ज्याघातवारणार्थे हस्तबद्धे चर्ममये पदार्थे (चामाटी) अमरे पाठान्तरम् तलाऽस्त्यस्य इनि । २गोधायुक्ते त्रि० । "ततः कवचधारी च तली खड्गी शरासनी" भा० उद्यो० १५७ अ० ।

**तलाची** स्त्री तलमञ्चति अन्च-क्विप् ङीप् अञ्चतेरल्लोपे पूर्वाणो दीर्घः। नलनिर्म्मितकटे (टङ्का) हारा० ।

**तलातल** न० सप्तसु अधोभुवनेषु पातालभेदे "ततोऽधस्ता-त्तलातले मयोनाम दानवेन्द्रस्त्रिपुराधिपतिर्भगवता पुरा-रिणा त्रिलोक्याः संचिकीर्षुणा निर्दग्धस्वपुरत्रयस्तत् प्रसादाल्लब्धपदो मायाविनामाचार्यो महादेवेन परि-रक्षितो विगतसुदर्शनभयो महीयते" भाग० ५।२४।२८ "अतलं वितलं सुतलं तलातलं महातलं रसा-तलं पातालमिति" भाग० ५।२४।११ । पातालकथने ।

**तलिका** स्त्री तलं वक्षःस्थलतलं बन्धनस्थानत्वेनास्त्यस्य बा० ठन् । अश्वहृदयस्थरज्जुभेदे(तङ)हेमच० ।

**तलित्** स्त्री तड़ित्+डस्य लः । विद्युति शब्दार्थचि० ।

**तलित** न०तल+तारका० इतच् । भृष्टमांसभेदे । यथा"शुद्ध-मांसविधानेन मांसं सम्यक् प्रसाधितम् । पुनस्तदाज्ये संभृष्टं तलितं प्रोच्यते बुधैः । अस्य गुणाः । "तलितं बलमेधाग्निमांसौजःशुक्रवृद्धिकृत् । तर्पणं लघु सु-स्निग्धं रोचनं दृढताकरम्" भा०प्र० ।

**तलिन** न० तल-इनन् । १शय्यायां हारा० । २विरले ३स्तोके ४स्वच्छे त्रि० मेदि० ५दुर्बले त्रि० हेम० ।

**तलिम** न० तल-बा० इमन् । १कुट्टिमे (छात) २शय्यायां ३खड्गे ५वितानके च मेदि० ।

**तलुन** पु० तल-उनन् । १वायौ २यूनि त्रि० स्त्रियां ङीप् ।

**तलेक्षण** पुंस्त्री तले ईक्षणमस्य । शूकरे शब्दार्थकल्प० स्त्रियां जातित्वात् ङीष् ।

**तलोदरी** स्त्री तलं निम्नमुदरमस्याः बहुव्रीहित्वेऽपि नासिकोदरेत्यादिविशेषोक्तेः ङीष् । कृशोदर्यां भार्यायां शब्दार्थकल्पतरुः । [ हारा० ।

**तलोदा** स्त्री तले उदकं यस्याः उदकस्य उदादेशः । नद्यां

**तल्क** न० तल-बा० कन् न कित्त्वम् । वने त्रिका० ।

**तल्प** पुंन० तल-पक् । १शय्यायाम्, २अट्टालिकायां, ३दारेषु च अमरः। "स्रग्विणं तल्प आसीनमर्हयेत् प्रथमं गवा" मनुः ।"औदुम्बरस्तल्पो भवति"तैत्ति० १।२।६।५ "सपदि विगतनिद्रस्तल्पमुज्झाञ्चकार" रघुः । "बलातपे दातु-मिवाधितल्पम्" माघः । "सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुः" । "गुरुतल्पोऽभिभाष्यैनस्तप्ते स्वप्यादयोमये"मनुः । "गुरोस्तल्पं तल्पं कलत्रं यस्य" प्राय०वि० । "आचार्यांणीं स्वां च सुतां गच्छंस्तु गुरु-तल्पगः" याज्ञ० । "पितृव्यदारगमने भ्रातृभार्यागमे तथा । गुरुतल्पव्रतं कुर्यान्नान्या निष्कृतिरुच्यते" संवर्त्तः "स गूढे गृहे उत्पन्नस्तस्य स्याद्यस्य तल्पजः" "यस्तल्पजं प्रमीतस्य क्लीबस्य व्यधितस्य वा" मनुः। तल्पे भवः यत् तल्प्य रुद्रभेदे पु० "नमस्तल्प्याय गेह्याय" यजु०१६।४४। तल्पे साधुः यत् । तल्प्या शय्यासाधौ त्रि० "शतं तल्प्या राजपुत्रा आशापालाः" शत ब्रा० १३।१।६।२ ।

**तल्पकीट** पु० तल्पे खट्वायां जातः कीटः शा० त० । (छार-पोका) कीटभेदे शब्दार्थचि० ।

**तल्पक** पु० तल्पे तत्संस्कारेऽधिकृतः बा० कन् । शय्या-रचनायामधिकृते दासभेदे । "सूपव्यञ्जनकर्त्तारस्तल्पका व्यजकास्तथा । प्रसाधका भोजकाश्च गात्रसंवाहका अपि" कामन्दकीयनीतौ चरभेदकथने ।

**तल्पन** न० तल्पं इवाचरति, तल्प+क्विप्-कर्त्तरि ल्यु । १करिपृष्ठे २पृष्ठवंशस्य मांसे च हारा० ।

**तल्पल** न० तल्पं तथाकारं लाति ला-क । करिपृष्ठवंशे "सान्द्रत्वककाशतल्पलाश्लिष्टकक्षाः" माघः "तल्पलाः पृष्ठवंशाः" मल्लि० हारावल्यां तल्पनेत्यत्र तल्पलेति वा पाठः माघे तल्पनेति वा पाठः । अन्यतरपाठः लिपिकर-प्रमादकृत इत्यवधेयम् ।

**तल्ल** त्रि० तस्मिन् लीयते ली-ड । १तस्मिन् लीने "तज्जला-निति शान्त उपासीत छान्दोग्योप० तल्लानित्यस्य भाष्ये "तज्जत्वात् तल्लत्वात् तदनत्वाच्चेत्युक्तम् २विले त्रिका० ३जलाधारविशेषे (तलाओ हिन्दिभाषा) मेदि०।

**तल्लज** पु० तत् प्रसिद्धं यथा तथा लजति लज-कान्तौ अच् ।